अदुष्टेषु समानेष्वियमनेनासाक्षित्वन्निमित्तान्युपलक्षितवान्। व्यासः "प्रथमे यत्र भिद्यन्ते साक्षिणश्च तथाऽपरे। परेभ्यश्च तथाचान्ये तं वादं शपथैर्नयेत्"। भिद्यन्ते प्रभेदं प्रतिपद्यन्ते। कात्यायनः "समत्वं साक्षिणां यत्र दिव्यैस्तत्रापि शोधयेत्। प्राणान्तिकविवादेषु विद्यमानेषु साक्षिषु। दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणः"। साक्षिषु विद्यमानेष्वपि तत्र दोषावष्टम्भेन दिव्यमालम्बत इत्यर्थः। समत्वं साक्षिणां यत्रेति। यत्रोभाभ्यां भाषावादिभ्यामुपन्यस्तानां साक्षिणां गुणतः सङ्ख्यातश्च तुल्यत्वमित्यर्थः। व्यासः "न मयैतत्कृतं लेख्यं कूटमेतेन कारितम्। अधरीकृत्य तत्पत्रमर्थे दिव्येन निर्णयः"। लेख्यदोषोद्भावने लेख्ये निर्णयाक्षमे तदारूढसाक्षिषु सुतरां दण्डापूपकन्यायेन दोषोद्भावनान्मानुषासम्भवे दिव्येन निर्णयः कार्य्य इत्यर्थः। प्रजापतिः "यन्नामगोत्रैर्यल्लेख्यं तुल्यं लेख्यं क्वचिद्भवेत्। अगृहीतधने तत्र कार्य्यो दिव्येन निर्णयः"। मूललेख्येन नामगोत्रैस्तुल्यं लेख्यान्तरविपरीतार्थं यदा तदा तदप्रमाणीकृत्य दिव्येन निर्णयः कार्य्य इत्यर्थः। कात्यायनः "यत्र स्यात्सोपधं लेख्यं तद्राज्ञे श्रावितं यदि। शोधयेत्तत्तु दिव्येन राजा धर्मासनस्थितः"। सोपधं यत्र छलकृतं यच्च मिथ्योत्तरे पूर्ववादिनः क्रियादानं नोत्तरवादिन इति प्रागुक्तं तत्र भाषावादिनो मानुषप्रमाणासम्भवादुत्तरवादिनश्च तदसम्भवान्मानुषासम्भवे च दिव्यानवसरादिति न्यायमूलमिति। यदि तत्रापि भाषावादिनो दिव्यभिन्नप्रमाणाभावस्तदा "न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत्। अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैरिति" कात्यायनीयादुत्तरवादिन एव दिव्यं देयम्। पूर्वार्द्धेनार्थिनो दिव्यनिषेधात् प्रत्यर्थिनोऽर्थात्सिद्धौ पुनः परार्द्धेन तद्विधाने सिद्धे सत्यारम्भो नियमायेति न्यायेन निषेधदार्ढ्यार्थत्वम्॥ प्राङ्न्यायकारणोत्तरयोः क्रियापदस्योभयक्रियापरत्वमपि मिथ्योत्तरे मानुषमात्रपरं कात्यायनीयानुरोधात्। नचैवमनुषङ्गानुपपत्तिः तदर्थकतयोभयान्वयस्यानुषङ्गहेतुत्वन्न यावदर्थकत्वस्य विरुद्धार्थकत्वे व्यवायवत्त्वाभिविबाधेनानुषङ्गस्य तुल्ययोगितानिबन्धनस्य भङ्गः किञ्चिदर्थानन्वयेऽपि तुल्ययोगच्छायाः सत्त्वात्तदभङ्गात्। यदा तु प्रत्यर्थी सन्दिहानस्तदा तस्याधिकारनिश्चयाभावान्मानुषप्रमाणाभावेऽपि न दिव्यं किन्त्वर्थिनोऽधिकारनिश्चयादिति ध्येयम्। नच "न कश्चिदिति" कात्यायनवचनविरोधः अधिकारानिश्चये तत्प्रवृत्त्यसम्भवात्। 'धनं धनी साधयतीति' लोकप्रवादोऽप्येतद्विषयाभिप्रायक एव। यत्र विवादविषये प्रत्यर्थी सन्दिहानस्तत्र तस्योत्तरानर्हतयेति व्यवहारतत्त्वलिखनन्त्वतत्त्वमेव अज्ञानरूपमिथ्योत्तरार्हत्वात्। अज्ञानस्य निश्चयाभावरूपस्य सन्देहेऽपि सम्भवात् प्रत्यर्थिन एव सर्वत्रोत्तरकर्तृत्वाच्च। यदा तु द्वयोरपि मानुषप्रमाणाभावो दिव्यानध्यवसायश्च तदा निर्णयोपायमाह पितामहः "लेख्यं यत्र न विद्येत न भुक्तिर्न च साक्षिणः। न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः। निश्चेतुं ये न शक्याः स्युर्वादाः सन्दिग्धरूपिणः। तेषां नृपः प्रमाणं स्यात्सर्वस्य प्रभुरिष्यते" इति। तादृग्व्यवहारे नृपेणोभयापीड़या स्वेच्छया काञ्चन व्यवस्थां कृत्वा देया सोभाभ्यान्नातिक्रमणीयेत्यर्थः। दिव्यावान्तरभेदादि सर्वं दिव्यप्रकरणे वक्ष्यामः।

**क्रियाफल** न० ६त०। "उत्पत्तिराप्तिर्विकृतिः संस्कृतिश्च चतुर्विधम्। क्रियाफलं प्राङ्कराद्यैः" कैवल्ये तन्न विद्यते" वेदा० प्र० उक्ते १कर्म्मफले उत्पत्त्यादौ, २यागादिजन्ये पुण्यापुण्यादौ च। क्रियाजन्ये तृप्तिस्वर्गादिरूपे प्रयोजनापरपर्य्यायरूपे ३फले "स्वरितञितः कर्त्रभिप्राये क्रियाफले" पा०। विवृतञ्चैतदस्माभिः शब्दार्थरत्ने यथा "स्वरितञिद्भ्यात्सूत्ररतङः कर्तृगामिन्येव सति क्रियाफले कर्तृवाचकत्वं नान्यथा तत्र फलञ्च न धातूपस्थाप्यं, जानात्यादीनां ज्ञानरूपफलस्य समवायेन कर्तृनिष्ठतया सर्वदैव जानीत इत्येव प्रयोगापत्तेः जानातीत्यादेरप्रयोगापत्तेश्च नेष्यते तु तथा शास्त्रकारैः। नापि क्रियाजन्यवेतनदक्षिणारूपलाभादि गौणं फलमिह विवक्षितं तथा सति सूदादेस्तादृशफलवत्त्वेन सूदः पचते ऋत्विजो यजन्ते इत्यादिप्रयोगापत्तेः। किन्तु फलतीति व्युत्पत्त्या प्रयोजनापरनाम क्रियाजन्यं तृप्तिस्वर्गादिरूपमेव मुख्यं फलं ग्राह्यं यथोक्तं हरिणा 'यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः। तत् प्रधानं फलं तासां न लाभादि प्रयोजनमिति"। प्रसिद्ध्यर्थं निष्पत्त्यर्थं पचादयः पाकादयः। तत् तासां पचादीनां प्रधानं फलमित्यर्थः। फलस्य प्राधान्यञ्चेतरापेक्षया बोध्यं तेन इतरेच्छानधीनेच्छाविषयत्वस्य तस्य सुखादिष्वेव सत्त्वेऽपि क्वचित्साक्षात्सुखादिरूपप्रयोजनालाभे तत्साधनरूपेतरफलस्यापि ग्रहणमिति द्रष्टव्यम्। तेन अपाद्धद इत्यादिस्वत्वविहिततङः सुखादि-